# Shri Bhairava Ashtakam

# શ્રીભૈરવાષ્ટકમ્

## Document Information

Text title : Bhairava AshTaka

File name : bhairavAShTakam.itx

Category : aShTaka, shiva

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : October 15, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીભૈરવાષ્ટકમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ શ્રીગુરવે નમઃ ॥

॥ શ્રીભૈરવાય નમઃ ॥

સકલકલુષહારી ધૂર્તદુષ્ટાન્તકારી
  સુચિરચરિતચારી મુણ્ડમૌઞ્જીપ્રચારી ।
કરકલિતકપાલી કુણ્ડલી દણ્ડપાણિઃ
  સ ભવતુ સુખકારી ભૈરવો ભાવહારી ॥ ૧॥

વિવિધરાસવિલાસવિલાસિતં નવવધૂરવધૂતપરાક્રમમ્ ।
મદવિઘૂર્ણિતગોષ્પદગોષ્પદં ભવપદં સતતં સતતં સ્મરે ॥ ૨॥

અમલકમલનેત્રં ચારુચન્દ્રાવતંસં
  સકલગુણગરિષ્ઠં કામિનીકામરૂપમ્ ।
પરિહૃતપરિતાપં ડાકિનીનાશહેતું
  ભજ જન શિવરૂપં ભૈરવં ભૂતનાથમ્ ॥ ૩॥

સબલબલવિઘાતં ક્ષેત્રપાલૈકપાલં
  વિકટકટિકરાલં હ્યટ્ટહાસં વિશાલમ્ ।
કરગતકરવાલં નાગયજ્ઞોપવીતં
  ભજ જન શિવરૂપં ભૈરવં ભૂતનાથમ્ ॥ ૪॥

ભવભયપરિહારં યોગિનીત્રાસકારં
  સકલસુરગણેશં ચારુચન્દ્રાર્કનેત્રમ્ ।
મુકુટરુચિરભાલં મુક્તમાલં વિશાલં
  ભજ જન શિવરૂપં ભૈરવં ભૂતનાથમ્ ॥ ૫॥

ચતુર્ભુજં શઙ્ખગદાધરાયુધં
   પીતામ્બરં સાન્દ્રપયોદસૌભગમ્ ।
શ્રીવત્સલક્ષ્મીં ગલશોભિકૌસ્તુભં
   શીલપ્રદં શઙ્કરરક્ષણં ભજે ॥ ૬॥

લોકાભિરામં ભુવનાભિરામં
   પ્રિયાભિરામં યશસાભિરામમ્ ।
કીર્ત્યાભિરામં તપસાઽભિરામં
   તં ભૂતનાથં શરણં પ્રપદ્યે ॥ ૭॥

આદ્યં બ્રહ્મસનાતનં શુચિપરં સિદ્ધિપ્રદં કામદં
   સેવ્યં ભક્તિસમન્વિતં હરિહરૈઃ સહં સાધુભિઃ ।
યોગ્યં યોગવિચારિતં યુગધરં યોગ્યાનનં યોગિનં
   વન્દેઽહં સકલં કલઙ્કરહિતં સત્સેવિતં ભૈરવમ્ ॥ ૮॥

॥ ફલશ્રુતિઃ ॥

ભૈરવાષ્ટકમિદં પુણ્યં પ્રાતઃકાલે પઠેન્નરઃ ।
દુઃસ્વપ્નનાશનં તસ્ય વાઞ્છિતર્થફલં ભવેત્ ॥ ૯॥

રાજદ્વારે વિવાદે ચ સઙ્ગ્રામે સઙ્કટેત્તથા ।
રાજ્ઞાક્રુદ્ધેન ચાઽઽજ્ઞમે શત્રુબન્ધગતેતથા
દારિદ્ર્યદુઃખનાશાય પઠિતવ્યં સમાહિતૈઃ ।
ન તેષાં જાયતે કિઞ્ચિદ દુર્લભં ભુવિ વાઞ્છિતમ્ ॥૧૦॥

॥ ઇતિ શ્રીસ્કાન્દે મહાપુરાણે પઞ્ચમેઽવન્તીખણ્ડે
અવન્તીક્ષેત્રમાહાત્મ્યાઽઽન્તર્ગતે શ્રીભૈરવાષ્ટકં સંપૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Shri Bhairava Ashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*